# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री-3 (OLD) | प्रश्नपत्रम् – 6 | गुणाः – ५० |
| विषयः – साहित्यम् | सत्रम् – 6 | समयः – १० तः १२ |
| दिनाङ्कः – १९/०७/२०२१ | सन्दर्भग्रन्थः – किरातार्जुनीयम् (प्रथमसर्गः) | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ कयोरपि द्वयोः पद्ययोः मल्लिनाथसूरिटीकानुसारं व्याख्या कार्या ।**

१ कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥
२ स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥
३ निरत्ययं साम न दानवर्जितं न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी गुणानुरोधेन विना न सत्क्रिया ॥

**प्रश्नः २ किरातार्जुनीयम् इति महाकाव्यस्य काव्यशास्त्रीयः परिचयः सङ्क्षेपेण लेख्यः ।**

**प्रश्नः ३ भारवेः यथोपलब्धजीवनपरिचयपूर्वकम् अर्थगौरववैशिष्ट्यं सोदाहरणपद्यं सङ्क्षेपेण साधनीयम् ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः मल्लिनाथसूरिटीकानुसारं व्याख्या कार्या ।**

१ वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥
२ न तेन सज्यं क्वचिदुद्यतं धनुर्न वा कृतं कोपविजिह्मिताननम् ।
गुणानुरागेण शिरोभिरुह्यते नराधिपैर्माल्यमिवास्य शासनम् ॥
३ इतीरयित्वा गिरमात्तसत्क्रिये गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा तदाचचक्षेऽनुजसन्निधौ वचः ॥

**प्रश्नः ५ प्रथमसर्गस्य प्रतिपाद्यविषयवस्तु सरलसुरगिरा लेख्यम् ।**

**प्रश्नः ६ वनेचरवर्णिता दुर्योधनशासनव्यवस्था सरलसुरगिरा लेख्या ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः मल्लिनाथसूरिटीकानुसारं व्याख्या कार्या ।**

१ व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधानसंवृताङ्गान्निशिता इवेषवः ॥

२ अवन्ध्यकोपस्य निहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्यस्य जनेन जन्तुना न जातहार्देन न विद्विषादरः ॥

३ विहाय शान्तिं नृप धाम तत्पुनः प्रसीद सन्धेहि विधाय विद्विषाम् ।
व्रजन्ति शत्रूनवधूय निःस्पृहाः शमेन सिद्धिं मुनयो न भूभृतः ॥

**प्रश्नः ८ युधिष्ठिरवचनानन्तरं द्रौपद्याः आक्रोशवाक्यानि सरलसुरगिरा वर्णनीयानि ।**

**प्रश्नः ९ किरातार्जुनीयप्रथमसर्गात् सूक्तियुक्तपद्यद्वयस्य विचारविस्तारः प्रस्तोतव्यः ।**

**प्रश्नः १० दशानाम् एकवाक्येन उत्तरं लिखत ।**

१ 'किरात' इत्यस्य पर्यायवाची कः ?
२ किरातार्जुनीयम् इत्यत्र प्रथमं कः समासः ?
३ किरातार्जुनीयप्रथमसर्गे कति श्लोकाः ?
४ किरातार्जुनीयमहाकाव्यस्य प्रथमं पदं किम् ?
५ युधिष्ठिरसमक्षं कः दुर्योधनवृत्तान्तं वर्णयति ?
६ कीदृशं वचः दुर्लभम् ?
७ वनेचरः कुत्र समाययौ ?
८ 'वसूनि वाञ्छन्' इत्यत्र 'वसूनि' अर्थात् किम् ?
९ किरातार्जुनीयमहाकाव्ये कति सर्गाः सन्ति ?
१० किरातार्जुनीयमहाकाव्यस्य प्रधानरसः कः ?
११ 'जितां सपत्नेन' अर्थात् किम् ?
१२ के पराभवं व्रजन्ति ?
१३ 'वृकोदरः' कः वर्तते ?
१४ प्रथमसर्गस्य अन्तिपद्यस्य किं वृत्तम् ?
१५ दुर्योधनः कं यौवराज्ये निधाय हव्येन हिरण्यरेतसं धिनोति ?

****